NEW SARASWATI HOUSE

3
ICSE

सरस्वती

# संस्कृत-सुधा

( पाठ्यपुस्तक )



Scanned with CamScanner

प्रथमः पाठः

# सुगमम् संस्कृतम् (संवादः)



प्रीतिः — अयि सुनीते, किमिति खिन्ना असि ?

सुनीता किम् करोमि ! संस्कृतपरीक्षायां मम अङ्काः न अति शोभनाः ।

प्रीतिः — अलं विषादेन । परिश्रमेण कालेन च सर्वं सिध्यति ।

सुनीता — सखि, तुभ्यं सत्यं वदामि—मह्यं तु संस्कृतं न रोचते । किम् एषा कठिना भाषा तुभ्यं रोचते ?

प्रीतिः — सुनीते, वस्तुतः संस्कृतं सुगमम् न तु कठिनम् ।

सुनीता — तत् कथम् ?

प्रीतिः — अभ्यासेन एव कौशलं भवति । अतः आदौ यत् क्लिष्टं प्रतीयते कालेन तत् सरलं भवति ।




सुनीता — परं धातुरूपाणि शब्दरूपाणि-सर्वमेतत् कथं कण्ठस्थं भवेत् ?

प्रीतिः — सुनीते, शब्दरूपाणां धातुरूपाणां च प्रयोगः सम्यक् बोद्धव्यः । किम् त्वं गृहं गत्वा पाठस्य वाचनं नियमेन करोषि ?

सुनीता — कथं करोमि ? अध्यापिका यत् कक्षायां शिक्षयति अहं तत् एव न बोधामि ।

प्रीतिः — अलं चिन्तया । सावधानं श्रवणेन पुनः पुनः च वाचनेन सर्वं बोधं गमिष्यति ।

सुनीता — कदाचित् सत्यं कथयसि त्वम् । कक्षायां समाहितचित्तं स्थित्वा पाठस्य च पुनरावृत्तिं कृत्वा मया भाषायाः प्रयोगः ज्ञातव्यः ।



प्रीतिः — चिन्ता मा अस्तु । अहमपि ते सहायतां करिष्यामि ।

सुनीता — एवं ममापि संस्कृतपरीक्षायां शोभनाः अङ्काः भविष्यन्ति ।

प्रीतिः — अथ किम् ! सखि, जानीहि एतत् यत् संस्कृतम् एका भाषा । श्रवणेन, भाषणेन, वाचनेन चैव लेखनम् शुद्धं भवति ।

सुनीता — सम्प्रति जानामि—संस्कृतं कथं पठितव्यम् । अद्य प्रभृति कक्षायां सावधानं स्थास्यामि ।

## शब्दार्थाः

| | | |
|---|---|---|
| सुगमम् | सरल | easy |
| अयि सुनीते | अरी सुनीता | O Sunita |
| किमिति ? (किम् + इति) | क्या बात है ? | What's the matter? |
| खिन्ना | उदास | sad |
| किम् करोमि ? | क्या करूँ ? | What shall I do? |
| अङ्काः | नम्बर | marks |
| अलं विषादेन | दुख मत करो | don't feel sad |
| कालेन | समय के साथ | with time |
| सर्वम् सिध्यति | सब (काम) पूरा होता है | everything can be accomplished |
| सखि | हे सखि | O friend |
| मह्यम् | मुझे/मेरे लिए | to/for me |
| रोचते | अच्छा लगता/अच्छी लगती है | interests |
| तुभ्यम् | तुम्हें/तुम्हारे लिए | to/for you |
| वस्तुतः | वास्तव में | in fact |
| तत् कथम् ? | वह कैसे ? | How is that? |
| कौशलम् | निपुणता | expertise |
| आदौ | शुरू में | in the beginning |
| क्लिष्टम् | कठिन | difficult |
| प्रतीयते | लगता/लगती है | appears |
| कण्ठस्थम् | याद | commit to memory |
| कदाचित् | शायद | perhaps |
| धातुरूपाणि | धातुरूप | conjugation |
| शब्दरूपाणि | शब्दरूप | declension |
| बोद्धव्यः | समझना चाहिए | should be understood |
| वाचनम् | वाचन, पढ़ना | reading |
| यत् | जो | that which |
| तत् एव | वही | that |
| न बोधामि | नहीं समझता/समझती हूँ | do not understand |
| श्रवणेन | सुनने से | by listening |
| वाचनेन | पढ़ने से | by reading |
| बोधं गमिष्यति | समझ आएगा | (you) will understand |
| समाहितचित्तम् | मन लगाकर | attentively |
| ज्ञातव्यः | जानना चाहिए | should be learnt |
| चिन्ता मा अस्तु | चिन्ता मत करो | don't worry |
| ते (तव) | तुम्हारा/तुम्हारे/तुम्हारी | your |
| ममापि (मम + अपि) | मेरे भी | mine too |
| अथ किम् | बिल्कुल, अवश्य ही | certainly |
| भाषणेन | बोलने से | by speaking |
| चैव (च + एव) | और ही | and |
| सम्प्रति | अब | now |
| जानामि | (मैं) जानता/जानती हूँ | (I) know |
| पठितव्यम् | पढ़ना/पढ़नी चाहिए | should be studied |
| जानीहि | जान लो | know |

**अवधेय-प्रयोगाः** सर्वनाम — अस्मद्, युष्मद् रूपाणि। अव्ययाः — अलम्, सावधानम्, सम्प्रति। धातवः — सिध्, बुध्, शिक्ष्, रुच्, स्था।



Scanned with CamScanner



# अभ्यासः

## मौखिकम्

### उच्चारणं क्रियताम्।

(उच्चारण कीजिए। Read it out.) *

| | | | | |
|---|---|---|---|---|
| 1. | अहम् | वयम् | त्वम् | यूयम् |
| 2. | माम् | अस्मान् | त्वाम् | युष्मान् |
| 3. | मया | अस्माभिः | त्वया | युष्माभिः |
| 4. | मह्यम् | अस्मभ्यम् | तुभ्यम् | युष्मभ्यम् |
| 5. | मत् | अस्मत् | त्वत् | युष्मत् |
| 6. | मम | अस्माकम् | तव | युष्माकम् |
| 7. | मयि | अस्मासु | त्वयि | युष्मासु |

## लिखितम्

**1. एकपदेन उत्तरं दीयताम्।**

(एक पद में उत्तर दीजिए। Answer in one word.)

परीक्षायां **कस्याः** अङ्काः न शोभनाः ? **सुनीतायाः** —**उदाहरणम्**

1. **कस्यां** परीक्षायाम् तस्याः अङ्काः न शोभनाः ?

   ..................................................

2. संस्कृतभाषा **कस्यै** न रोचते ?

   ..................................................

3. कौशलं **कथं** भवति ?

   ..................................................

4. **कस्य** पुनरावृत्तिः आवश्यका ?

   ..................................................

* यह मौखिक-अभ्यास तुलनात्मकं-बोध हेतु दिया गया है। सम्पूर्ण शब्द-रूप के लिए देखें—परिशिष्टम्। (This oral exercise should help in comparative understanding of the forms of words in question. For full declension please see—परिशिष्टम् (Appendex.)



Scanned with CamScanner

5. प्रीतिः **कस्याः** साहाय्यम् करिष्यति ?

.................................................

6. वस्तुतः संस्कृतं सुगमम् इति का **वदति** ?

.................................................

7. शब्दरूपाणां **कः** सम्यक् बोद्धव्यः ?

.................................................

## 2. प्रश्नोत्तरम् एकवाक्येन दीयताम्।

(प्रश्न का उत्तर एक वाक्य में दीजिए। Give the answer in one sentence.)

1. सुनीता किमर्थं खिन्ना ? ....................................
2. कार्यं कथम् सिध्यति ? ....................................
3. सर्वम् बोधं कथं गमिष्यति ? ....................................
4. भाषायाः लेखनम् कथम् शुद्धं भवति ? ....................................

## 3. विशेषणविशेष्यानां परस्परमेलनं कुरुत।

(विशेषण-पदों का विशेष्य-पदों से परस्पर मेल कीजिए। Match the following adjectives with nouns.)

| विशेष्यपदानि | विशेषणपदानि |
|---|---|
| भाषा | शोभनाः |
| लेखनम् | कठिना |
| संस्कृतम् | खिन्ना |
| अङ्काः | शुद्धम् |
| सुनीता | सुगमम् |

## 4. मञ्जूषायाः सहायतया अनुच्छेदं पूरयत।

(मञ्जूषा की सहायता से अनुच्छेद को पूरा कीजिए। Complete the paragraph with help from the box.)

**विषादेन, पाठस्य, सरलम्, खिन्ना, अभ्यासेन, संस्कृत-परीक्षायाम्, सखीम्।**

सुनीता **खिन्ना** अस्ति। .................................... तस्याः अङ्काः न शोभनाः। प्रीतिः ताम् समाश्वासयति। सा .................................... वदति, अलं .................................... । .................................... वाचनं नियमेन कुरु। .................................... एव कौशलम् भवति। वस्तुतः संस्कृतम् .................................... अस्ति।



Scanned with CamScanner

## तृतीयः पाठः

# वृद्धः कपोतः

कस्मिंश्चित् वने कपोतानां एकं दलं वसति स्म। एकः वृद्धः कपोतः दलस्य नेता संरक्षकश्च आसीत्। प्रतिदिनं कपोताः अरण्ये दानान् अन्विष्यन्ति उदरपूर्तिं च कुर्वन्ति स्म।

एकदा एकः व्याधः तत्रागतः। आकाशे अनेकान् कपोतान् वीक्ष्य सः अतीव प्रसन्नः अभवत्, सोऽचिन्तयत् 'अहो मे सौभाग्यम्! परम् इदानीं तु सायंकालः सञ्जातः; किम् करोमि। अस्तु, श्वः इह आगत्य तण्डुलकणान् विकिरिष्यामि। विपुलं तण्डुलराशिं दृष्ट्वा एते कपोताः भूमौ अवतरिष्यन्ति। तस्मिन् एव काले अहं सर्वान् कपोतान् जालबद्धान् करिष्यामि।

प्रातः यावत् कपोताः आकाशे उत्पतन्ति तावत् ते तण्डुलकणान् भूमौ पश्यन्ति। इदानीं भोजनस्य का चिन्ता इति विचार्य प्रमुदिताः ते दलस्य नेतारम् वृद्धकपोतम् उपगम्य सर्वं वृत्तान्तं तस्मै कथयन्ति।

वृद्धः कपोतः प्राज्ञः आसीत्। तस्य मनसि संशयः जातः। निर्जने वने विपुलः तण्डुलराशिः कथं भवेत्! नूनम् अत्र किमपि भयकारणम्। सः तान् कपोतान् अवदत्—कोऽपि तत्र न गच्छतु। सर्वे आदेशं पालयन्तु।

लोभवशात् कपोताः गुरुजनस्य आदेशम् न मन्यन्ते स्म। परिणामतः ते निर्दयस्य व्याधस्य जाले बद्धाः अभवन्। जालबद्धाः ते अतीव पश्चात्तापं गताः। अत्रान्तरे वृद्धकपोतः अपि तत्र प्राप्तः। कपोतान् समाश्वासयन् सोऽवदत्—विषादं मा कुरुत, धैर्यं धारयत; 'संहतिः कार्यसाधिका'—यूयम् एकीभूय जालम् आदाय आकाशे उत्पतत। वनस्य समीपे अस्माकं मित्रं मोनूमूषकः वसति। वयम् तत्रैव गच्छाम। अधुना एष एव उपायः। 'त्याज्यं न धैर्यं विधुरेऽपि काले।'



मोनूमूषकः झटिति कपोतानां जालं स्वतीक्ष्ण-दन्तैः अकृन्तत्। जालात् मुक्ताः प्रहृष्टाः कपोताः अवदन्—'धन्यवादाः, मित्रमूषक। अद्य: भवतः कृपया अस्माकं जीवनं सुरक्षितम्' इति।

'गुरुवर, वयम् अनुगृहीताः स्मः ! अपराधः नः क्षम्यताम्, वयं लज्जिताः स्मः । अद्यप्रभृति वयं गुरुजनानाम् आज्ञां नित्यं पालयिष्यामः ' इति ।

सत्यमेतत्—आज्ञा गुरूणां हि पालनीया ।

## शब्दार्थाः



| | | |
|---|---|---|
| कस्मिंश्चित् (कस्मिन् + चित्) | किसी में | in some |
| संरक्षकश्च (संरक्षकः च) | (और) रक्षक | (and) guardian |
| दानान् | दाने | grains/feed |
| अन्विष्यन्ति स्म | खोजते थे | looked for |
| उदरपूर्तिं | पेट की पूर्ति | filling of stomach |
| व्याधः | शिकारी | hunter |
| तत्रागतः (तत्र + आगतः) | वहाँ आया | came there |
| वीक्ष्य (वि + ईक्ष् + ल्यप्) | देखकर | having seen/seeing |
| अहो मे सौभाग्यम् | मैं कितना भाग्यवान हूँ | how lucky I am |
| किम् करोमि ? | क्या करूँ ? | what shall I do? |
| इदानीम् | अब | now |
| सञ्जातः | हो गया है | has become |
| अस्तु | ठीक है | all right/ let it be |
| इह | यहाँ | here |
| आगत्य | आकर | after coming |
| तण्डुलकणान् | चावल के कण/दाने | grains of rice |
| विकिरिष्यामि | बिखेरूँगा | will scatter |
| अवतरिष्यन्ति (अव + तृ) | उतरेंगे | descend/come down |
| यावत् | जैसे ही | just as |
| तावत् | तभी | at that moment |
| का चिन्ता | क्या चिन्ता | no need to worry |
| दलस्य नेतारम् | दल के नेता को | Leader of the group |
| उपगम्य | पास जाकर | having approached |
| किमपि (किम् + अपि) | कोई | some/something |
| कथं भवेत् ? | कैसे सम्भव है ? | How is it possible? |
| नूनम् | निश्चय ही | undoubtedly |
| भयकारणम् | भय का कारण | reason to fear |
| न गच्छतु | न जाए | should not go |
| पश्चात्तापं गताः | पश्चाताप को प्राप्त हुए | repented |
| अत्रान्तरे | इसी बीच | in the meanwhile |
| प्राप्तः | पहुँचा | arrived |
| समाश्वासयन् | आश्वासन देते हुए | consoling |
| संहतिः | एकता | unity |
| कार्यसाधिका | काम पूरा करने वाली | one that accomplishes |
| एकीभूय | एक होकर | together |
| उत्पतत (उत् + पत्) | उड़ जाओ | fly away |
| तत्रैव (तत्र + एव) | वहीं | there |
| गच्छाम (लोट्-लकारः) | जाते हैं | let us go |
| मोनूमूषकः | मोनू नाम का चूहा | mouse Monu |
| स्वतीक्ष्णदन्तैः | अपने तेज दाँतों से | with his sharp teeth |
| अकृन्तत् | काट दिया/दी | cut |

वृद्धः कपोतः



Scanned with CamScanner

SANSKRIT ASSIGNMENT (CLASS-8) 29.4.20

Q1. पाठ- तृतीय से पहली पंक्ति कस्मिंश्चित् से लेकर छठी पंक्ति जालबद्धान् तक हिन्दी में अनुवाद करें।

Q2. पाठ - तृतीय से शब्दार्थ स्मरण करें एवं लिखें।

Scanned with CamScanner